दधिमुखः पुं, (दधिवत् शुभ्रं मुखं यस्य ।) वानरविशेषः । स सुग्रीवस्य श्वशुरः तस्य मधुवनपालकश्च । इति रामायणम् ॥ (यथा, महाभारते । ३ । २८२ । ७ । [वान् ॥"

"श्रीमान् दधिमुखो नाम हरिवृद्धोऽपि वीर्य-

नागविशेषः । यथा, महाभारते । १ । ३५ । ८ ।

"सुरामुखो दधिमुखस्तथा विमलपिण्डकः ॥"

अयन्तु दर्व्वीकराणां सर्पाणामन्यतमः । इति सुश्रुते कल्पस्थाने ४ अध्याये ॥)

दधिशोणः, पुं, वानरः । इति त्रिकाण्डशेषः ॥

दधिस(श)क्तवः, पुं, दध्युपसिक्ताः सक्तवः । करम्भः । इत्यमरः । २ । ६ । ४८ ॥ दहिछातु इति भाषा ॥ नित्यबहुवचनान्तोऽयम् ॥ (यथा, महाभारते । १३ । १०४ । ६१ ।

"न पाणौ लवणं विद्वान् प्राश्नीयान्न च रात्रिषु । दधिसक्तून् न भुञ्जीत वृथामांसञ्च वर्जयेत् ॥")

दधिसारं, क्ली, (दध्नः सारम् ।) नवनीतम् । इति हेमचन्द्रः । ३ । ७२ ॥

दधिस्नेहः, पुं, (दध्नः स्नेहः ।) दधिसरः । तत्पर्य्यायः । सरः २ दध्युत्तरगम् ३ कद्दरम् ४ । इति रत्नमाला ॥

दधिस्वेदः, पुं, (दध्नः स्वेद इव ।) घोलम् । इति जटाधरः ॥

दधीचः, पुं, दधीचिमुनिः । इति शब्दभेदप्रकाशः ॥ (यथा, महाभारते । १ । १३८ । १२ ।

"दधीचस्यास्थितो वज्रं कृतं दानवसूदनम् ॥")

दधीचिः, पुं, मुनिविशेषः । स अथर्व्वमुनेरौरसात् कर्द्दमकन्यायां शान्तिनाम्न्यां जातः । वृत्रवधार्थं देवैरस्यास्थ्ना वज्रं निर्म्मितम् । इति श्रीभागवतम् ॥ यथा,—

"ऋतेऽस्थिभ्यो दधीचस्य निहन्तुं त्रिदशद्विषः । तस्मात् यत्नाद्दधिश्रेष्ठो याच्यतां सुरसत्तमाः ॥ दधीचेरस्थीनि देहीति तैर्व्वधिष्यथ दानवान् । तत् श्रुत्वा सहसा देवैर्याचितो मुनिभिस्तथा ॥ ददौ चास्थीनि देवेभ्यो दधीचिः सुमनास्तदा । प्राणायामं ततः कृत्वा देहं त्यक्त्वा शुभाक्षरान् ॥ सर्व्वलोकान् जयान् प्राप्तो येभ्यो नावर्त्तते पुनः । तस्यास्थिभिरथो शक्रः प्रहृष्टः सुमनास्तथा ॥ कारयामास दिव्यानि तानि प्रहरणान्युत । वज्रासिशूलचक्रञ्च परिघा विविधा गदाः ॥ विश्वकर्म्मा सुराणान्तु परिघाद्यायुधानि च ॥"

इति वह्निपुराणे दानावस्थानिर्णयनामाध्यायः ॥

दधीच्यस्थि, क्ली, (दधीचेरस्थि ।) वज्रम् । हीरकम् । इति त्रिकाण्डशेषः ॥

दधृक् [ष्] त्रि, (धृष्णोतीति । धृष प्रागल्भ्ये + "ऋत्विग्दधृगिति ।" ३ । २ । ५९ । इति क्विन् द्वित्वादिकञ्च निपात्यते ।) धृष्टः । इति त्रिकाण्डशेषः ॥ (धर्षकः । यथा, ऋग्वेदे । ५।६६।३ ।

"राततव्यस्य सुष्टुतिं दधृक्स्तोमैर्मनामहे ॥")

दध्रः, पुं, (दधतं जीवेभ्यः पापपुण्यफलाफलं ददातीति । दध दाने + बाहुलकात् नः ।) यमः । इति शब्दरत्नावली ॥

दध्याकरः, पुं, (दध्नः आकर इव ।) दधिसमुद्रः । इति शब्दार्थकल्पतरुः ॥

दध्यानी, स्त्री, (दधिवत् शुभ्रतां आनयतीति । आ + नी + क्विप् ।) सुदर्शना । इति रत्नमाला ॥ सुदर्शनगुलञ्च इति भाषा । दग्खरा इति केचित् । पुराति इति केचित् । मदनमस्त इति हिन्दी भाषा ॥

दध्युत्तरं, क्ली, (दध्नः उत्तरं शेषजातम् ।) दधिस्नेहः । इति शब्दचन्द्रिका ॥ (यथा, हरिवंशे । ७८ । ६२ ।

"पयसः सर्पिषश्चैव दध्नो दध्युत्तरस्य च । यथाकामं प्रदानाय भोज्यादिश्रयणाय च ॥")

दध्युत्तरगं, क्ली, (दध्न उत्तरं चरमावस्थां गच्छतीति । गम + डः ।) दधिस्नेहः । इति रत्नमाला ॥

दध्युदः, पुं, (दधिवदुदकं यस्य । उत्तरपदस्य च इत्युदकस्योदादेशः ।) दधिसमुद्रः । इति जटाधरः ॥

दनुः, स्त्री, कश्यपपत्नी । सा दक्षकन्या दानवमाता च । इति त्रिकाण्डशेषः ॥ (यथा, मत्स्यपुराणे ६ अध्याये ।

"कश्यपस्य प्रवक्ष्यामि पत्नीभ्यः पुत्त्रपौत्त्रकान् । अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा तथा ॥ सुरभिर्व्विनता तद्वत् ताम्रा क्रोधवशा इरा । कद्रूर्व्विश्वा मुनिस्तद्वत्तासां पुत्त्रान्निबोधत ॥" "दनुः पुत्त्रशतं लेभे कश्यपाद्बलदर्पितम् । विप्रचित्तिः प्रधानोऽभूत् येषां मध्ये महाबलः ॥ द्विमूर्द्धा शकुनिश्चैव तथा शङ्कुशिरोधरः । अयोमुखः शम्बरश्च कपिलो वामनस्तथा ॥ मरीचिर्मघवांश्चैव इरा गर्भशिरास्तथा । विद्रावणश्च केतुश्च केतुवीर्य्यः शतह्रदः ॥ इन्द्रजित् सत्यजिच्चैव वज्रनाभस्तथैव च । एकचक्रो महाबाहुर्व्वज्राक्षस्तारकस्तथा ॥ असिलोमा पुलोमा च बिन्दुर्बाणो महासुरः । स्वर्भानुर्वृषपर्व्वा च एवमाद्या दनोः सुताः ॥"

दानवविशेषे, पुं । यथा, गोः रामायणे कबन्धस्योक्तौ । ३ । ७५ । २४ ।

"श्रियो मां मध्यमं पुत्त्रं दनुं नाम्ना च दानवम् ॥")

दनुजः, पुं, (दनोर्जायते इति । जन + डः ।) असुरः । इत्यमरः । १ । १ । १२ ॥ (यथा, भागवते । ६ । ६ । ४० ।

"तत्रैव विभूतयो दितिदनुजादयश्चापि ॥")

दनुजद्विट्, [ष्] पुं, (दनुजानां असुराणां द्विट् शत्रुः । यद्वा, दनुजान् द्वेष्टीति । द्विष + क्विप् ।) देवः । इति शब्दरत्नावली ॥ (दानवशत्रौ, त्रि । यथा, प्रयोगरत्नमालायां शब्दप्रकरणस्यादौ ।

"नमो नन्दकुमाराय पराय दनुजद्विषे ॥")

दनुसूनुः, पुं, (दनोः सूनुः पुत्त्रः ।) असुरः । इति जटाधरः ॥

दन्तः, पुं, (दम + "हसिमृग्रिणिति ।" उणां । ३ । ८६ । इति तन् ।) अद्रिकटकः । कुञ्जः । इति मेदिनी । ते, २३ ॥ शैलशृङ्गम् । इति त्रिकाण्डशेषः ॥ चर्व्वणसाधनास्थि । दाँत इति भाषा । गर्भस्थस्य षष्ठे मासि गुह्यदन्तपङ्क्तिर्भवति । इति सुखबोधः ॥ तत्पर्य्यायः । रदनः २ दशनः ३ रदः ४ । इत्यमरः । २।६।६१ ॥ द्विजः ५ खरुः ६ । इति शब्दरत्नावली ॥ * ॥ तत्शुक्लकारकौषधं यथा,—

हरिरुवाच ।

"हरितालं यवक्षारं पत्राङ्गं रक्तचन्दनम् । जाती हिङ्गुलकं लाक्षा पक्वतैलेन पेषयेत् ॥ हरीतकीकषायेण स्पृष्ट्वा दन्तान् प्रलेपयेत् । दन्ताः सुरक्तलोहिताः पुंसः श्वेता रुद्र ! न संशयः ॥"

इति गारुडे १८३ अध्यायः ॥ * ॥

"शङ्खमामलकीपत्रं धातक्याः कुसुमानि च । पिष्ट्वा तत् पयसा सार्द्धं सप्ताहं धारयेन्मुखे ॥ स्निग्धाः श्वेताश्च दन्ताश्च भवन्ति विमलप्रभाः ॥"

इति तत्रैव १८५ अध्यायः ॥ * ॥

"मूलं गोक्षुरकस्यैव चर्व्वित्वा नीललोहित ! । दन्तकीटव्यथा नश्येद्दन्यासुरविमर्द्दन ! ॥"

इति च गारुडे १६३ अध्यायः ॥ * ॥

सदन्तजातस्य शुभाशुभफलं यथा,—

अथ जातभद्रादि । तत्र दन्तजन्मचिन्ता ।

"जातः सदन्तः पितृमातृहन्ता ·
तातं विहन्यात् प्रथमे तु मासे ।
अम्बां द्वितीये सहजं तृतीये
मासे चतुर्थे शुभकारकः स्यात् ॥
मिष्टान्नभोजी सुभगः सुताख्ये
षष्ठे सुखी पण्डितकल्पबुद्धिः ।
ततोऽधिकः स्यात् बलवान् तुरङ्गाख्ये
मासेऽष्टमे वित्तसुखैर्व्विहीनः ॥

सुरप्रतापी नवमे स्तुताश्च दशमे तथा । एकादशे द्वादशे च सुखी च सुभगो भवेत् ॥ अष्टौ पुत्तलिकान् कृत्वा सुगन्धैर्गन्धकैस्तथा । स्रोतःसु संक्रमे चापि स्नापयेत् शुक्लपुष्पकैः ॥ स्नानं चंक्रमणस्याधः शम्भोर्द्दर्शनमन्ततः । होमं विप्रार्च्चनञ्चैवमशुभे दन्तदर्शने ॥"

इति ज्योतिस्तत्त्वम् ॥

रतिक्रीडायां तस्याघातस्थानानि यथा,—

"स्तनयोर्गण्डयोश्चैव ओष्ठे चैव तथाधरे । दन्ताघातः प्रकर्त्तव्यः कामिनीनां सुखावहः ॥"

इति कामशास्त्रम् ॥ * ॥

अथ दन्तरोगाणां निदानादि यथा,—

"शोणितं दन्तवेष्टेभ्यो यस्याकस्मात् प्रवर्त्तते । दुर्गन्धीनि सकृष्णानि प्रक्लेदीनि मृदूनि च ॥ दन्तमांसानि शीर्य्यन्ते पचन्ति च परस्परम् । शीतादो नाम स व्याधिः कफशोणितसम्भवः ॥ १ ॥ दन्तयोस्त्रिषु वा यस्य श्वयथुर्जायते महान् । दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः ॥ २ ॥ स्रवन्ति पूयरुधिरं चला दन्ता भवन्ति च । दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः ॥ ३ ॥ श्वयथुर्द्दन्तमूलेषु रुजावान् कफरक्तजः । लालास्रावी स विज्ञेयः शौषिरो नाम नामतः ॥ कण्डूमान् शौषिरो गदः । इति च पाठः ॥ ४ ॥